ON INDIA GOVERNMENT SERVICE

115728

HFP

The Editor,
"Gurukul Patrika", (Monthly),
Gurukul Vishwa Vidyalaya,
Hardwar. (U.P).

५६५
२८-११-५८

(अ) मलिमासस्य कथा - ३ पृष्ठ
(ब) मलमास व्रत पूजा - ३ पृष्ठ
(स) मल मास पूजा दान विधि - १ पृष्ठ

38

(अ) मलिमासस्य कथा - पृष्ठ-३
(ब) मल मास व्रत पूजा - " -३
(स) मल मास पूजा दान विधि - " -१

PRESS INFORMATION BUREAU.
G VERNMENT OF INDIA
NEW DELHI-2

P.I.O. 289.
B B.B H.. Delhi-No. 11/115/57-D/30-10-57 16,75,000

१

पृथिवीदानफलसमफलप्राप्त्यर्थं इमान् शालेनगुलनिर्मितान् व
स्त्रांश्च निर्मलान् प्रजापतिदैवतान् त्रयस्त्रिंशत्संख्याकान् प्रजाप
तिदैवताकगुडघृताग्निदैवताक हिरण्यसमन्वितान् यथानाम
गोत्रायेत्यादिवादिना स्वप्रार्थनामंत्रः नारायणजगद्दीपभास्क
रपते पूर्वकवेतोनानेन पुत्रांश्च हेपरान्सामिवर्द्धय १५॥

अथ मलमासे पूजादानविधिः सहस्रांशुं देवं षोडशोपचारैः संपूज्य त्रि
कांस्यपात्रे हिरण्यगुडसर्पिः समन्वितान् त्रयस्त्रिंशदपूपकान् निधाय
देवदेवाय नमः इत्यभिविच्य विष्णुरूपी सहस्रांशुः सर्वपापप्रणाश
नः अपूपान्नप्रदानेन मम पापं व्यपोहतु चंद्रोऽग्निसमेलापूपाः थलि
त एकत्र निर्मिताः आकारः सर्वदेवानां मे कुबेर मङ्गलम् ततस्तिल
कुशजलमादाय ॐ तत्सदद्य ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवा
राहकल्पे जम्बूद्वीपे भारतखण्डे आर्यावर्त्तैकदेशे वर्त्तमाने कलौयुगे प्रथमचर
णे ऽमुकायने ऽमुकर्त्तौ अमुकाधिमासे ऽमुकपक्षे ऽमुकराशिस्थि
ते सवितरि अमुकतिथौ पर्वणि अमुकवासरे नक्षत्रकरणयोगमुहू
र्त्ते ऽमुकगोत्रो ऽमुकशर्माहं ममेतद्रूपच्छिद्र समस्तसंख्यापापहरत्व वर्षा
वच्छिन्नस्वर्लोकमहत्तत्त्वकामस्य यादिम देवतादेवतापूर्वक

ॐ श्री गणेशाय नमः अथ मलमासव्रतपूजा आचम्याद्यमलेत्युक्ति पठित्वा संकल्पं
कुर्यात् ॐ अद्याधिकमासे कृष्णपक्षे वा शुक्लपक्षे अमुकतिथौ अमुकगोत्रः अमुकशर्माऽहं
मम ब्रह्मलोकाधिकरणकरुद्रलोकगमनविष्णुभवनवासपुत्रपौत्रादिवृद्धि
अक्षयपवित्रपुण्यलक्षणपूर्वक श्रीसांबसदाशिवपूजनव्रतकथाश्रवणम
हं करिष्ये पंचोपचारैर्गणपतिकलशयोः पूजनं पंचामृतेन महारुद्रमयं शिव
प्रतिमां संस्थाप्य प्राणप्रतिष्ठां कृत्वा अस्य श्रीपार्थिवेश्वरचिंताम
णि विद्यामंत्रस्य निग्रहानुग्रहकर्ता ब्रह्मा ऋषिः कामदुघा गायत्री छंदः
श्री घरवरस्तु रूपिणी पार्थिवेश्वरचिंतामणिर्देवता ह्रौं बीजं ह्रीं शक्तिः न
मः कीलकं ममाभीष्टाय नमः सर्वांगे अभीष्टसिद्ध्यर्थे विनियोगः अथांग
न्यासः शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्रीछंदसे नमः हृदि देव
तायै नमः सर्वांगे अभीष्टसिद्ध्यर्थे जपे विनियोगः अथ करन्यासः ॐ ह्रौं
ह्रीं जूं सः सर्वज्ञानाय शिवाय अंगुष्ठाभ्यां नमः ॐ ह्रौं ह्रीं जूं सः सर्वतृ
प्तिशक्तिशिवाय तर्जनीभ्यां नमः ॐ ह्रौं ह्रीं जूं सः नित्यमलुप्तशक्तिशिवा

१

यमध्यमाभ्यांवषट् ॐ ह्रौं ह्रीं जूं सः ज्ञानशक्तिशिवायमध्यमाभ्यांवषट् ॐ
ह्रौं ह्रीं जूं सः नित्यानेहशक्तिशिवाय कनिष्ठकाभ्यांवौषट् ॐ ह्रौं ह्रीं जूं सः
अनंतशक्तिशिवायकरतलकरपृष्ठाभ्यांनमः अथांगन्यासः ॐ ह्रौं ह्रीं जूं
सः सर्वज्ञानायशिवायनमः ॐ ह्रौं ह्रीं जूं सः सर्वतृप्तिशक्तिशिवायशि
रसेस्वाहा ॐ ह्रौं ह्रीं जूं सः नित्यमलुप्तशक्तिशिवायशिखायैवषट् ॐ
ह्रौं ह्रीं जूं सः ज्ञानशक्तिशिवायकवचायहुं ॐ ह्रौं ह्रीं जूं सः नित्यानेहश
क्तिशिवायनेत्रत्रयायवौषट् ॐ ह्रौं ह्रीं जूं सः अनंतशक्तिशिवायफट् प्रा
णायामं अथध्यानं वटेमहेशहरसिद्धसेविते कल्पद्रुमे १ जितपाद
पल्लवं विद्याप्रदेभक्तजनेष्टवंदितं ध्यायेत्सदाकामदुघंप्रसन्नं योगा
गमायाप्तत्नरूपं सांख्यानविघ्नेकिलत्यक्तानिष्ठं तंविघ्ननाथंकलि
कल्मषघ्नं ध्यायेच्छिवालिंगितहृष्टदेहं ॐ ह्रौं ह्रीं जूं सः शूलपाणायेन
मः इहागच्छइहातिष्ठ ॐनमोभगवत्यै उमादेव्यैशंकरप्रियायैनमः
इत्यनेनवामांके उमांपूजनं पंचोपचारेण ॐ ह्रौं ह्रीं जूं सः शिवायन

१

शिवं सर्वत्र विन्यसेत् नमः शिवायेति मंत्रेणाष्टोत्तरशतं जपेत् जपांते गु
ह्यातिगुह्येति पठित्वा देव हस्ते जलं समर्पयेत् ततो गौरी शाले द्वामापयेत्
गौरी च वल्लभो भो भो स्तुत्वा स्तोत्रेण भक्तितः ईश्वर उवाच ॐ नमो नादा
त्मने नमस्तुभ्यं नमो विंदु कलात्मने नमो लिंग रूपाय रूपातीताय ते
नमः त्वंमाता सर्वलोकानां त्वमेव जगतः पिता त्वं भ्राता त्वं सुहृन्मि
त्रं त्वं प्रियस्त्वं पितामहः शर्वाय क्षिति रूपाय धात्रे सुरभिने नमः म
हादेवाय सोमाय अमृताय नमोऽस्तु ते उग्राय यजमानाय नमस्ते कर्म
योगिने पार्थिवानां च लिंगानां यन्मयाद्य जनं कृतं तेन मे भगवन्तु
ष्टो वांछितार्थान् प्रयच्छतु प्रार्थनां कुर्यात् नमः शिवाय शांताय कार
णत्रय हेतवे निवेदयामि चात्मानं त्वं गतिः परमेश्वरः ॐ सर्वेभ्यो
महादेवो वरदो दुःख हारकः वाङ्मनः काय संभूतं पातकं चापपा
तकं त्वत्प्रसादेन देवेश नाशं यातु सदा मम नमः शिवाय सोमाय

मः पिनाकपाणयेनमः इतिस्नानं ॐ ह्रौं ह्रीं नमः शिवायनमः इतिजलेन स्ना
नेनमं त्रेणाचमनीयं मधुपर्कं उपवीतं वस्त्रयुग्मं गंधः तंडुलान्पुष्पं
विल्वपत्रं धूपं दीपं नैवेद्यं स्वरूपाः दक्षिणां फलं कदलीफलानि
च तांबूलं सुगंधि द्रव्यं मूलेन पंच पुष्पांजलयः अष्टमूर्तिपूजा ॐ
शर्वाय क्षितिमूर्तये नमः प्राच्यां ॐ भवाय जलमूर्तये नमः ईशान्यां ॐ
रुद्राय अग्निमूर्तये नमः उदीच्यां ॐ उग्राय वायुमूर्तये नमः वायव्यां ॐ
भीमाय आकाशमूर्तये नमः प्रतीच्यां ॐ पशुपतये यजमानमूर्तये नमः
नैरृत्यां ॐ महादेवाय सोममूर्तये नमः दक्षिणस्यां ॐ ईशानाय सूर्यमू
र्तये नमः आग्नेय्यां शिरसि विन्यसेद्रुद्रं ललाटे चंद्रशेखरं नेत्रे त्रिलोच
नं देवं भैरवं कर्णयोर्न्यसेत् घ्राणे तु शंकरं देवं मुखे पशुपतिं तथा नी
लग्रीवं कंठदेशे हृदये व्यापकं न्यसेत् करे गंगाधरं देवं शिवं नाभौ तु
विन्यसेत् वामदेवं तथा गुह्ये जंघे देवं त्रिलोचनं सर्वज्ञं विन्यसेत्पादे

सोमाय पंचवक्त्राय शूलिने नंदिभृंगिमहाकालगणयुक्ताय शंभवे
नमो देवाधिदेवाय नमो भक्तप्रियाय च आह्निमां सर्वदुःखघ्नं रोगघ्नो
कालिकाहूर दुष्टत्राणाय मे शंभो ये स्मरंति सकृत्स्तोत्रं न तेषां वि
वकवचसहस्रनामस्तोत्रपाठं कृत्वा आचमनीयं जलं पुनः प्रदक्षिणा
र्कः ततउपायनं ततः शय्यादिदानं पंचोपचारैः कुर्यात् ब्राह्मणेभ्यः संख्य
अमत्यकृतैतच्छिवसांगतासिद्ध्यर्थं मनद्रव्यमूल्यवामितदक्षिणां द
द्यात् ॐ सोपकरणाशय्यायै नमः ॐ ब्राह्मणाय नमः संकल्पः ॐ अद्या
द्य मासे कृष्णपक्षे चतुर्दश्यां तिथौ अमुकगोत्रो अमुकशर्माहं कृतैतन्मल
मासव्रतशिवपूजनव्रतसांगतासिद्ध्यर्थं एकशिवप्रीतिकाम इमां सोप
करणाशय्यां विष्णुदेवतामित्यादि दानप्रतिष्ठा सर्वत्र छत्रदानं उपा
नहौदानं वस्त्रदानं काष्ठासन काष्ठपादुकादानं अजवदानं व्रीहि
दानं कांस्यपात्रस्य त्रयस्त्रिंशत् ३३ रूपेभ्यो नमः ३ ब्राह्मणभोजनं

कल्पः ततः प्रतिमादानं ॐ सोपकरणा हिरण्मयी प्रतिमायै नमः ३ ततो
गोदानं प्रतिगृहीता को दाता इति अन्यदेष्ठीयाय कस्मैचिद्वेदपारगा
य ब्राह्मणाय शिवप्रतिमां सर्ववस्त्रं प्रतिपादयेत् मंत्रहीनं क्रियाही
नं भक्तिहीनं महेश्वरः यत्पूजितं मया देव परिपूर्णं तदस्तु मे ततो
पुष्पांजलिं दत्वा देवं विसर्जयेत् ततः कलशजलेनाम्रपल्लवैर्य
जमानायाभिषेचं कुर्यात् अच्छिद्रावधारणे व्रतो प्रथमदिनं द्व
विधं भुंजीत व्रतदिनेऽलवण भोजनं कुर्यात् व्रतस्यांगत्वासिद्ध्य
र्थे ब्राह्मणेभ्यो भूरिदक्षिणां दद्यात् इति श्री भविष्योत्तरपुराणे
महादेवपार्वतीसंवादे मल्लिव्रतपूजा॥ शुभम

श्रुतं कार्यं नरोत्तमैः ३० प्रतिपद्दिवसे कुर्यादंतधावनं प्रयत्नतः एकादश्यां
चतुर्दश्यां चतुर्वर्गफलप्रदं ३१ संध्यायां नियमं कुर्यादंतधावनपूर्वकं प्रात
स्नात्वा प्रभाते धात्रीस्नात्वा व्रतं समाचरेत् ३२ तदनु प्रतिमामेकां सौवर्णां मत्स्यभा
कृतिं कारयेद्विमानेन स्नापयेज्ज्ञो यथाविधिः ३३ पंचामृतैस्तैलतोयैः स्वयमे
वेन च वै कारयेत् ताम्रपात्रोपरि न्यस्य पूजयेत्कलशोपरि सुधीः ३४ जलपूर्णे
सरत्ने च पूगीफलसमन्विते अक्षितैः पुष्पमालाभिः सप्तधान्योपरिस्थि
ते ३५ तत्र प्रतिष्ठां कुर्वीत स्वस्तिवाचनपूर्वकं चंदनेन सुगंधपुष्पैः का
लोद्भवैस्तथा ३६ धूपैर्दीपैश्च नैवेद्यैस्तांबूलैश्च शुभैः फलैः अर्चयि
त्वार्पयेत्तत्र छत्रोपानत्कमंडलं ३७ च यष्टिं प्रावरणं कांस्यपात्रे तिला
पत्र स्वस्त्यलं दत्त विप्रस्य सकाशात् शृणुयात्कथां ३८ अथाचार्यं समभ्य
र्च्य तस्मै सर्वं समर्पयेत् परितुष्टः प्रतस्माद्गोपमान्नं सशार्करं ३९ सद्द

5728 A

12

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः। अपकारिषु यः साधुः स साधुः सद्भि
रुच्यते २२ इति वाक्यं समाकर्ण्य तामामन्त्र्य सत्वरं मुनिः उवाच मृदु चिन्तना
त्तु दुर्वासा ऋषिपुंगवः २३ दुर्वासा उवाच यन्मयोदीरितं वाक्यं तत्तृणेवन
विष्यति परं किंचित्तव दास्यामि यत्कृत्वा स्वर्गमेष्यसि २४ यदा मलिम्लुचो
मासस्तदा कार्यं व्रतं शुभं पूजयामि जनकोपायो हेवं काम फलप्रदं २५
श्रुत्वेति परमं वाक्यं ऋषिणा समुदीरितं ऊचुः सम्भ्रमाः सर्वाः श्रुतमस्मि योदी
रितं २६ व्रतमेतत्केन प्रकारेण क्रियते ऋषि बहु जनं कस्मिन्मासे तिथौ
कस्यां कश्चिद्देवः फलार्थिभिः केन दानेन किं पूज्यं कुत्र पूजा महेश्व
र २७ तत्सर्वं प्रयत्नेन भूत्वा कथयस्व तपोधन २८ दुर्वासा उवाच श्रूयतां
मलमासस्य विधानं कथयामि वः यस्य श्रवणमात्रेण मुच्यते पातकं तु
का २९ मलमासमनुप्राप्ते शुक्लपक्षे प्रतिपदे नारी चेद्वा यदि वा नरः

तं भोजयेद्द्विजश्रेष्ठं लेभे मोदेद्याद्दक्षिणां गृहीत्वा द्विजवाक्यानि ततो भोजनमाच
रेत् ४० अष्टादशलवणांश्चैव कुटुंबपरिवारितः एवं कुर्वीत तं मर्त्यो मुच्यते पापकं
चुकात् ४१ तस्मात्त्वं प्रयत्नेन कर्त्तव्यं पापभीरुभिः अद्यैव पार्जितं पुण्यम
कृत्वा दहति ध्रुवं ४२ इत्युक्त्वा स मुनिः सद्यः सत्यलोकमगात्परं तत्र ध्याने
गतो देवि पुरा कालेऽडुंबावुदः ४३ महर्षेस्तस्य शापेन तान्यपि प्रवराः स्त्रियः
चांडालस्य गृहे जातास्ते भोजाति स्वरालये ४४ कृतं येनैवं व्रतं तेनाभिम
तिलश्च समुद्भवं तद्व्रतस्य प्रभावेन भव स्वस्य रत्नो भवत् ४५ इति ते क
थितं देवि लवणस्य च विधानकं यत्कृत्वा पुरुषे नेह नं प्राप्यते धनमुत्तम
म् ४६ स्त्रियश्च भर्त्तृसन्मानं बालाश्चैवोत्तमां गतिं कुमार्यः स्वपतिं
देवि लभंते नात्र संशयः ४७ अन्यजन्मनि ते ये च न कुर्वंति विधवास्त्रि
यः यास्मिन् राज्ये व्रतमिदं क्रियते चारु लोचने ४८ तत्र दुर्भिक्ष

२

नापि ज्ञानमवाप्नोति कदाचन ॥ यः करोति नरो भक्त्या पुत्रहेतोर्व्रतं त्विदं ४९ धा
र्मिकं लभते पुत्रं वंशवृद्धिकरं शुभं विद्यार्थी लभते विद्यां सुखार्थी लभ
ते सुखं ५० कन्यार्थी लभते कन्यां शुभां शीलगुणान्वितां एवं माहात्म्यम
खिलं व्रतस्यैव विनिर्दिशं ५१ तवाग्रे प्रोक्तं एतेन सत्यं जानीहि नान्यथा
एवं व्रतविधिं कृत्वा हकाशाच्छूलपाणिनः ५२ सर्वकामफलान्प्रे
हृतं देव्याय यथाविधिः शिवार्चनाद्धेतो लभेत परमं स्वर्गमुत्तमं ५३ सौ
भाग्यमपि देवेन तस्मै दत्तं महात्मना दृष्ट्वा विशाल्वे तु कानीह दद्यात् ब्रह्म
मासतः ॥५४॥ यदि मौनं व्रतं कुर्याच्च करे ब्रह्म जायते पठनाच्छ्रवणादे
वि वाजपेयफलं लभेत् ॥ इति श्रीशिवपुराणे पार्वतीं प्रति महादेव
प्रोक्तं मलिम्लुचव्रतमाहात्म्यं समाप्तम् शुभम् ॥ ॥

२